अट्ठारससागराऊ देवो जाओत्ति। गोसालगोऽवि पुणो भयवंतं अणेगप्पयारेहिं दुव्वयणेहिं पहणिउं पवत्तो। इओ य **सुनक्खत्त**नामो साहू तहा अवक्कोसिज्जमाणं भगवंतं निसामिऊण तणं व नियजीवियमवि गणंतो सिग्घमागंतूण गोसालं जहा सव्वाणुभूई तहेव अणुसासइ, नवरं गोसालगपक्खित्ततेउलेसापलीविओ समाणो भयवंतं तिक्खुत्तो वंदिऊण सयमेव पंच महव्वयाइं उच्चारेइ, समणा य समणीओ खामेइ, आलोइयपडिक्कंतो य कालं काऊण अच्चुए कप्पे बावीससागरोवमाउयदेवेसु देवत्तेणं उव्वज्जइ। एवं च तम्मि पंचत्तं गए संते गोसालो दुन्निग्गहिओ वेयालोव्व लद्धावयासो विसेसओ परुसक्खराहिं गिराहिं तज्जणं कुणंतो वागरिओ सकारणं जयगुरुणा- 'भो महाणुभाव! गोसालग सिट्ठपहसमइक्कंतं तुह चरियं, जं मए पव्वाविओ मए सिक्खाविओ मए बहुस्सुईकओ ममावि अवण्णवाई जाओ सि।' एवं च जयगुरुणा सयमेव संलत्ते तेण अणाकलियकोवावेगेण सत्तट्ठ पयाइं पच्चोसक्किऊण पमुक्का महया संरंभेण भगवओ अभिमुहा तेउलेसा।

देवः जातः। गोशालकः अपि पुनः भगवन्तम् अनेकप्रकारैः दुर्वचनैः प्रहन्तुं प्रवृत्तवान्। इतश्च **सुनक्षत्र**नामकः साधुः तथा आक्रोश्यमानं भगवन्तं निःशम्य तृणमिव निजजीवितमपि गणयन् शीघ्रमागत्य गोशालकं यथा सर्वानुभूतिः तथैव अनुशास्ति, नवरं गोशालप्रक्षिप्ततेजोलेश्याप्रदीपितः सन् भगवन्तं त्रिधा वन्दित्वा स्वयमेव पञ्च महाव्रतानि उच्चरति, श्रमणानां च श्रमणीनां क्षाम्यति, आलोचितप्रतिक्रान्तश्च कालं कृत्वा अच्युते कल्पे द्वाविंशतिसागरोपमायुष्कदेवेषु देवत्वेन उत्पद्यते। एवं च तस्मिन् पञ्चत्वं गते सति गोशालः दुर्निगृहीतः वेतालः इव लब्धाऽवकाशः विशेषतः परुषाऽक्षराभिः गिर्भिः तर्जनं कुर्वन् व्याकृतः सकारणं जगद्गुरुणा 'भोः महानुभाव! गोशालक! शिष्टपथसमतिक्रान्तं तव चरित्रम्, यद् मया प्रव्राजितः, मया शिक्षापितः, मया बहुश्रुतीकृतः ममाऽपि अवर्णवादी जातः असि।' एवं च जगद्गुरुणा स्वयमेव संलप्ते तेन अनाकलितकोपाऽऽवेगेन सप्ताऽष्टौ पदाति प्रत्यवष्वष्क्य प्रमुक्ता महता संरम्भेण भगवतः अभिमुखा तेजोलेश्या।

સાગરોપમના આયુષ્યવાળા દેવ થયા. ગોશાળો પણ ફરીથી ભગવાનને અનેક પ્રકારના દુર્વચનોવડે કહેવા લાગ્યો. તે વખતે **સુનક્ષત્ર** નામના સાધુ તથાપ્રકારે આક્રોશ કરાતા ભગવાનને સાંભળીને, પોતાના જીવિતને તૃણ સમાન ગણીને તત્કાળ ત્યાં આવીને ગોશાળકને જેમ સર્વાનુભૂતિએ કહ્યું હતું તેમ કહ્યું. વિશેષ એ કે-ગોશાલકે નાંખેલી તેજોલેશ્યાથી બળતા તે મુનિએ ભગવાનને ત્રણ વાર વાંદીને પોતે જ પાંચ મહાવ્રતોનો ઉચ્ચાર કર્યો, સાધુ-સાધ્વીઓને ખમાવ્યા, આલોચના તથા પ્રતિક્રમણ કરી, કાળધર્મ પામીને અચ્યુત દેવલોકમાં બાવીશ સાગરોપમના આયુષ્યવાળા દેવોની મધ્યે દેવપણે ઉત્પન્ન થયા. આ પ્રમાણે તે મુનિ મરણ પામ્યા ત્યારે ગોશાળો દુઃખે કરીને નિગ્રહ (વશ) કરી શકાય તેવા વેતાળની જેમ અવકાશ પામીને વિશેષે કરીને કઠોર વાણીવડે તર્જના કરવા લાગ્યો, ત્યારે તેને કારણ સહિત ભગવાને કહ્યું-'હે મહાનુભાવ! ગોશાળા! તારું ચરિત્ર સત્પુરુષોના માર્ગને ઉલ્લંઘન કરનારું છે. કેમકે મેં જ તને પ્રવ્રજ્યા આપી, મેં જ શિક્ષા આપી અને મેં જ બહુશ્રુતવાળો કર્યો, તો મારો જ અવર્ણવાદ કરનારો તું થયો.' આ પ્રમાણે જગદ્ગુરુએ પોતે જ કહ્યું ત્યારે તેણે ન ધારી શકાય એવા (અત્યંત) ક્રોધના આવેશથી સાત આઠ પગલાં પાછા ખસીને મોટા વેગવડે ભગવાનની સન્મુખ તેજોલેશ્યા મૂકી.

अह मंदरगिरिरायं व निट्ठुरं जिणसरीरमक्कमिउं।
असमत्था मारुयमंडलिव्व सा निहयमाहप्पा ।।१।।

सयलदिसामुहपसरियय॑डतरतेयरइयपरिवेसा।
आरत्तियदीवयमालियव्व सक्खा विरायंती ।।२।।

जच्चतवणिज्जपुंजुज्जलंगपहपडलविजियसोहस्स।
भीयव्व तक्खणं चिय सामिस्स पयाहिणं कुणइ ।।३।।

तप्फरिसवसेण य भुवणबंधुणो अमयसीयतणुणोऽवि।
जाओ मणागमेत्तं परितावो सव्वगत्तंमि ।।४।।

सा य तेउलेसा 'अहो अहं इमिणा महापावेण एरिसमकज्जं कारावियं'त्ति जायतिव्वकोवव्व

अथ मन्दरगिरिराजमिव निष्ठुरं जिनशरीरमाक्रम्य।
असमर्था मारुतमण्डली इव सा निहतमाहत्म्या ।।१।।

सकल दिङ्मुखप्रसृतप्रचण्डतरतेजोरचितपरिवेषा।
आरात्रिकदीपकमालिका इव साक्षाद् विराजमाना ।।२।।

जात्यतपनीयपुञ्जोज्ज्वलाङ्गप्रभापटलविजितशोभस्य।
भीता इव तत्क्षणमेव स्वामिनः प्रदक्षिणां करोति ।।३।।

तत्स्पर्शवशेन च भुवनबन्धोः अमृतशीततनोः अपि।
जातः मनाग् मात्रं परितापः सर्वगात्रे ।।४।।

सा च तेजोलेश्या 'अहो अहमनेन महापापेन एतादृशमकार्यं कारिता' इति जाततीव्रकोपा इव

તે વખતે મેરુપર્વતની જેવા કઠણ જિનેશ્વરના શરીરને આક્રમણ કરવા વાયુમંડળની જેમ અસમર્થ તેજોલેશ્યાનું માહાત્મ્ય હણાઇ ગયું, (૧)

સમગ્ર દિશાઓના મુખમાં પ્રસરતા પ્રચંડ તેજનો ગોળાકાર પરિધિ રચાયો, તેથી તે લેશ્યા સાક્ષાત્ આરતિના દીવાની શ્રેણીની જેવી શોભવા લાગી. (૨)

જાતિવંત સુવર્ણના સમૂહ જેવા દેદીપ્યમાન ભગવાનના શરીરની કાંતિના સમૂહવડે તેની શોભા હણાઇ જવાથી જાણે તે ભય પામી હોય તેમ તત્કાળ સ્વામીની પ્રદક્ષિણા કરવા લાગી. (૩)

તેના સ્પર્શના વશથી અમૃત જેવા શીતળ શરીરવાળા પણ જગતબંધુના સર્વ ગાત્રોમાં કાંઇક પરિતાપ થયો. (૪)

ત્યારપછી-'અહો! આ મહાપાપીએ (ગોશાળાએ) મારી પાસે આવું અકાર્ય કરાવ્યું.' એમ સમજીને જાણે તીવ્ર

उड्ढं उप्पइत्ता गोसालगस्स सरीरं डहमाणी अंतो लहुमणुपविट्ठा, तओ गोसालो काउरिसोव्व समत्थेण नियतेएण विणिहओऽवि धिट्ठिममवलंबिऊण एवं पयंपेइ-'अहो कासवा! तुमं मम इमिणा तेएण अभिहओ संतो अंतो छण्हं मासाणं पित्तजरपरिगयसरीरो दाहवेयणोवक्कमियाउओ छउमत्थो चेव कालं करिस्ससि।' भगवया भणियं-'भो मंखलिपुत्त! नो खलु अहं तुह तेएण अहिहओ छण्हं मासाणं अंतो कालं करिस्सामि, किं तु अन्नाइं सोलस वासाइं पडिपुन्ननाणदंसणधरो विहरिस्सामि, पच्छा खवियसयलकम्मंसो सिवपयं गमिस्सामि, तुमं पुण अप्पणो तेएण निद्दड्ढसरीरो अंतो सत्तरत्तस्स पित्तमहाजरजलणपलित्तगत्तो छउमत्थो चेव कालं करिस्ससि'त्ति।

अह सव्वत्थवि नयरे मुद्धजणो जंपिउं समाढत्तो।
दोण्हं एत्थ जिणाणं परोप्परं वट्टइ विवाओ ।।१।।

उर्ध्वं उत्पत्य गोशालकस्य शरीरं दहन्ती अन्तः लघुः प्रविष्टा। ततः गोशालः कापुरुषः इव समस्तेन निजतेजसा विनिहतः अपि धृष्टिमवलम्ब्य एवं प्रजल्पति 'अहो काश्यप! त्वं मम अनेन तेजसा अभिहतः सन् अन्तः अन्तः षण्णां मासानां पित्तज्वरपरिगतशरीरः दाहवेदनोपक्रान्तायुष्कः छद्मस्थः एव कालं करिष्यसि।' भगवता भणितं 'भोः मङ्खलिपुत्र! नो खलुं अहं तव तेजसा अभिहतः षण्णां मासानां अन्तः कालं करिष्यामि, किन्तु अन्यानि षोडष वर्षाणि प्रतिपूर्णज्ञानदर्शनधरः विहरिष्यामि, पश्चात् क्षपितसकलकर्मांशः शिवपदं गमिष्यामि, त्वं पुनः आत्मनः तेजसा निर्दग्धशरीरः अन्तः सप्तरात्र्याः पित्तमहाज्वरज्वलनप्रदीप्तगात्रः छद्मस्थः एव कालं करिष्यति।'

अथ सर्वत्राऽपि नगरे मुग्धजनः जल्पितुं समारब्धवन्तः।
द्वयोः अत्र जिनयोः परस्परं वर्तते विवादः ।।१।।

કોપવાળી થઇ હોય તેમ તે તેજોલેશ્યા ઊંચે ઊડીને ગોશાળાના શરીરને બાળતી તેની અંદર શીઘ્રપણે પેસી ગઇ. ત્યારપછી કાપુરુષ(દુષ્ટ પુરુષ)ની જેવો ગોશાળો પોતાના સમર્થ તેજવડે હણાયા છતાં પણ ધૃષ્ટતા (ધૈર્ય) ધારણ કરીને આ પ્રમાણે બોલવા લાગ્યો કે-'અહો કાશ્યપ! તું આ મારા તેજથી હણાયો છે તેથી છ માસની અંદર પિત્તજ્વરવડે શરીર વ્યાપ્ત થવાથી દાહની વેદનાવડે આયુષ્યનો ઉપક્રમ થઇને છદ્મસ્થપણે કાળધર્મને પામીશ.'

ત્યારે ભગવાને તેને કહ્યું કે-'હે મંખલીપુત્ર! નિશ્ચે હું તારા તેજથી હણાઇને છ માસની અંદર કાળ નહીં કરું, પરંતુ હજુ બીજાં સોળ વર્ષ પરિપૂર્ણ (કેવળ) જ્ઞાન-દર્શનને ધારણ કરતો વિચરીશ. પછી સર્વ કર્મોના અંશોનો ક્ષય કરીને મોક્ષપદ પામીશ, પરંતુ તું પોતાના તેજવડે બળેલા શરીરવાળો સાત રાતદિવસમાં જ પિત્તમહાજ્વરરૂપી અગ્નિવડે પ્રદીપ્ત ગાત્રવાળો છદ્મસ્થ અવસ્થાએ જ કાળધર્મ પામીશ.'

ત્યારપછી સમગ્ર નગરમાં મુગ્ધજનો પરસ્પર બોલવા લાગ્યા કે-'અહીં બે જિનેશ્વરોનો પરસ્પર વિવાદ ચાલે છે. (૧)

तत्थेगो भणइ इमं पुव्विं कालं करिस्ससि तुमंति।
इयरोविहु तदभिमुहं इममेव पयंपए वयणं ।।२।।

न मुणिज्जइ परमत्थो को मिच्छा वयइ को य सच्चंति?।
कुसला भणंति वीरो सच्चं वागरइ नो इयरो ।।३।।

इओ य जयगुरू नियसमणगणमामंतिऊण भणइ-'भो समणा! जह तणरासी तुसरासी पत्तरासी बुसरासी वा जलणजालापलीविया समाणी पणट्ठतेया जायइ, एवं गोसालो मम वहाय तेयं निसिरित्ता **विणट्ठतेउलेसमाहप्पो जाओ,** तम्हा छंदेण निब्भया तुब्भे एयं धम्मियाए चोयणाए पडिचोएह, हेऊदाहरणकारणेहिं निप्पिट्ठपसिणवागरणं करेह'त्ति वुत्ते तहत्ति पडिसुणित्ता जयनाहं च सविणयं वंदिऊण समणा तं भणिउं पवत्ता।

तत्रैकः भणति इमं 'पूर्वं कालं करिष्यति त्वम्' इति।
इतरोऽपि खलु तदभिमुखं इदमेव प्रजल्पति वचनम् ।।२।।

न ज्ञायते परमार्थः कः मिथ्या वदति कश्च सत्यम्?।
कुशलाः भणन्ति वीरः सत्यं व्याकरोति नो इतरः ।।३।।

इतश्च जगद्गुरुः निजश्रमणगणमाऽऽमन्त्र्य भणति 'भोः श्रमणाः! यथा तृणराशिः, तुषराशिः, पत्रराशिः, बुसराशिः वा ज्वलनज्वालाप्रदीपितः सन् प्रणष्टतेजा जायते एवं गोशालः मम वधाय तेजः निसृत्य विनष्टतेजोलेश्यामाहात्म्यः जातः। तस्मात् छन्देन निर्भयाः यूयं एवं धार्मिकया नोदनया प्रतिनोदयत, हेतूदाहरणकारणैः निष्पृष्टप्रश्नव्याकरणं कुरुत' इति उक्ते तथेति प्रतिश्रुत्य जगन्नाथं च सविनयं वन्दित्वा श्रमणाः तं भणितुं प्रवृत्तवन्तः-

---

તેમાં એક જણ બીજાને કહે છે કે-તું પ્રથમ કાળધર્મને પામીશ ત્યારે બીજો પણ તેની સન્મુખ તે જ વચન બોલે છે. (૨)

આનો પરમાર્થ સમજાતો નથી કે-કોણ અસત્ય બોલે છે અને કોણ સત્ય બોલે છે?' પરંતુ કુશળ પુરુષો તો એમ બોલતા હતા કે-'વીર ભગવાન સત્ય બોલે છે. બીજો સત્ય બોલતો નથી.' (૩)

ત્યારપછી જગદ્ગુરુએ પોતાના સાધુ સમુદાયને બોલાવીને કહ્યું કે-'હે સાધુઓ! જેમ તૃણનો ઢગલો, ફોતરાનો ઢગલો, પાંદડાંનો ઢગલો કે બુસનો ઢગલો અગ્નિની જ્વાળાથી બળીને તેજ રહિત થઈ જાય છે, તેમ ગોશાળે મારા વધને માટે તેજોલેશ્યા મૂકીને પછી તેજોલેશ્યાના માહાત્મ્ય વિનાનો થયો છે, તેથી ઇચ્છા પ્રમાણે નિર્ભય થઇને તમે ધર્મની પ્રેરણાવડે પ્રેરણા કરો. હેતુ, ઉદાહરણ અને કારણે કરીને તેને પ્રશ્નોત્તર રહિત કરો.' આ પ્રમાણે ભગવાને કહ્યું ત્યારે 'બહુ સારું' એમ તેમનું વચન અંગીકાર કરી, વિનય સહિત વંદના કરી તે સાધુઓ તેને કહેવા લાગ્યા કે :-

किं च-भो गोसालग! किं तुज्झ दंसणे एस सत्थपरमत्थो।
जं लोगमग्गचुक्कं तमेरिसं कम्ममायरसि? ।।१।।

तहाहि-धम्मगुरुं अवमन्नसि नियमाहप्पं पवित्थरसि बहुसो।
जुत्तीहिवि जं न घडइ तं भाससि मुक्कमज्जाय! ।।२।।

वायाए जीवरक्खं पयडसि तं लोयमज्झयारंमि।
सद्धम्मगुणपहाणे सयं तु निद्दहसि साहूवि ।।३।।

एवंविहं अकज्जं कुणंति न कयाइ किर चिलायावि।
तुमए पुण अलियवियद्दमेव सव्वं समायरियं ।।४।।

किं च भोः गोशालक! किं तव दर्शने एषः शास्त्रपरमार्थः।
यद् लोकमार्गभ्रष्टः त्वम् एतादृशं कर्माचरसि? ।।१।।

तथाहि-धर्मगुरुं अवमन्यसे, निजमाहात्म्यं प्रविस्तारयसि बहुशः।
युक्तिभिः अपि यन्न घटते तद्भाषसे मुक्तमर्याद! ।।२।।

वाचया जीवरक्षां प्रकटयसि त्वं लोकमध्ये।
सद्धर्मगुणप्रधानान् स्वयं तु निर्दहसि साधूनपि ।।३।।

एवंविधम् अकार्यं कुर्वन्ति न कदापि किल चिलाताः अपि।
त्वया पुनः अलिकवितर्दमेव सर्वम् समाचरितम् ।।४।।

'હે ગોશાળા! શું તારા દર્શનમાં આ શાસ્ત્રનો પરમાર્થ છે કે જેથી લોકમાર્ગથી ભ્રષ્ટ થયેલા આવા કર્મને તું આચરે છે? (૧)

હે મર્યાદાના ત્યાગ કરનાર! તું ધર્મગુરુની અવજ્ઞા કરે છે, પોતાના (તારા) માહાત્મ્યને બહુ વિસ્તારે છે, અને જે યુક્તિથી પણ ઘટતું નથી તેવું વચન બોલે છે. (૨)

તું લોકોની મધ્યે વાણીવડે કરીને જીવરક્ષા(અહિંસા ધર્મ)ને પ્રગટ કરે છે, પણ ઉત્તમ ધર્મ અને ગુણવાળા સાધુઓને તું પોતે જ બાળે છે. (૩)

આવા પ્રકારનું અકાર્ય તો ભિલ્લ લોકો પણ કદાપિ કરતા નથી, અને તેં તો સર્વ અસત્ય અને અદ્ધર જ આચરણ કર્યું. (૪)

न सरसि उवयारं एत्तियंपि जं रक्खिओ सि जयगुरुणा।
तह वेसियायणुम्मुक्कतेयनिड्डज्झमाणंगो ।।५।।

इइ भगवओ समणेहिं धम्मियाए चोयणाए चोइज्जमाणो गोसालो आसुरुत्तो कोवेण मिसिमिसेमाणो समाणो जाव साहूणं सरीरस्स रोममेत्तंपि निड्डहिउं न तरइ ताव पडिहयसामत्थं तं नाऊण केऽवि आजीवियथेरा जयगुरुं गुरुत्तणेण पडिवन्ना, अन्ने पुण विवेगविरहिया तहेव ठिया। गोसालगोऽवि खणमेत्तं विगमिऊण रोसेण व माणेण य दीहुण्हं नीससंतो दाढियलोमाइं लुंचमाणो, हत्थे पकंपयंतो, चलणेहिं भूमिं कुट्टमाणो, अंतो विसप्पंतदुस्सहतेउल्लेसादाहवसेण य हा हओऽहमस्सीति पुणरुत्तं वाहरंतो अकयकज्जो चेव भगवओ समीवाओ नीहरिऊण गओ सट्ठाणं, जयगुरुणाऽवि जंपियं-'भो समणा! जं

न स्मरसि उपकारं एतावदपि यद् रक्षितः असि जगद्गुरुणा।
तथा वैश्यायनोन्मुक्ततेजोनिर्दह्यमानाऽङ्गः ।।५।।

इति भगवतः श्रमणैः धार्मिकया नोदनया नोद्यमानः गोशालः आशु रुष्टः कोपेन उद्दीप्तः सन् यावत् साधूनां शरीरस्य रोममात्रमपि निर्दग्धुं न शक्नोति तावत्प्रतिहतसामर्थ्यं तं ज्ञात्वा केऽपि आजीविकस्थविराः जगद्गुरुं गुरुत्वेन प्रतिपन्नाः, अन्ये पुनः विवेकरहिताः तथैव स्थिताः। गोशालकोऽपि क्षणमात्रं विगम्य रोषेण च मानेन च दीर्घोष्णं निःश्वसन् श्मश्रुलोमानि लुञ्चन्, हस्ताभ्यां प्रकम्पमानः, चरणाभ्यां भूमिं कुट्टन्, अन्तः विसर्पद्दुःसहतेजोलेश्यादाहवशेन च 'हा! हतोऽहमसि' इति पुनरुक्तं व्याहरन् अकृतकार्यः एव भगवतः समीपतः निहृत्य गतः स्वस्थानम्। जगद्गुरुणाऽपि जल्पितं 'भोः

---

[1]વેસીયાયણ નામના ઋષિએ તેજોલેશ્યા મૂકીને તારું અંગ બાળવા માંડ્યું હતું તે વખતે જગદ્ગુરુએ તારું રક્ષણ કર્યું હતું, તે ઉપકારને પણ તું સંભારતો નથી?' (૫)

આ પ્રમાણે ભગવાનના સાધુઓએ ધર્મ સંબંધી પ્રેરણાવડે ગોશાળાને પ્રેરણા કરી ત્યારે તે તત્કાળ રોષવાળો થયો, અને ક્રોધે કરીને ધમધમતો તે જ્યારે સાધુઓના શરીરના રૂંવાડા માત્રને પણ બાળવાને સમર્થ થયો નહીં ત્યારે તેને નાશ પામેલા સામર્થ્યવાળો જાણીને કેટલાએક આજીવિક મતના સ્થવિર સાધુઓએ જગદ્ગુરુને ગુરુપણે અંગીકાર કર્યા. બીજા કેટલાક વિવેક વિનાના ત્યાં જ રહ્યા. ગોશાળો પણ ક્ષણમાત્ર નિર્ગમન કરીને (ત્યાં રહીને) રોષવડે અને માનવડે દીર્ઘ અને ઉષ્ણ નિઃશ્વાસ નાખતો, દાઢીના કેશનું લુંચન કરતો, હાથને કંપાવતો, પગવડે ભૂમિને કુટતો તથા શરીરમાં પ્રસરતા દુઃસહ તેજોલેશ્યાના દાહના વશે કરીને 'હા! હા! હું હણાઇ ગયો' એમ વારંવાર બોલતો, કાર્ય કર્યા વિના જ ભગવાનની સમીપથી નીકળીને પોતાને સ્થાને ગયો. પછી જગદ્ગુરુએ કહ્યું

---

१. वैशंपायन.

इमं गोसालेण मम वहट्ठा तेयं निसिट्ठं तं खलु अंग-वंग-मगह-मलय-मालव-अच्छ-वच्छ-कोच्छ-पाढ-लाढ-वज्जि-मासि-कासि-कोसल-अवाह-सुभुत्तराभिहाणाणं सोलसण्हं जणवयाणं उच्छायणाए भासरासीकरणयाए समत्थंति वुत्ते विम्हियहियया मुणिणो जायत्ति।

सो य गोसालो कोडरनिहित्तहुयवहो तरुव्व निड्डज्झमाणो कहिंपि रइं अलहंतो तस्स दाहस्स पसमणत्थं करकलिएणं भायणेणं मज्जपाणगं पियमाणो, तव्वससंभूयमएण य अभिक्खणं गायमाणो, अभिक्खणं नच्चमाणो, अभिक्खणं हालाहलाए कुंभकारीए अंजलिपग्गहपुव्वयं पणामं कुणमाणो, अभिक्खणं भंडगनिमित्तकुट्टियमट्टियंतोनिहित्त-सिसिरकलिलसलिलेण सरीरं उवसिंचमाणो, अड्डवियड्डाइं पइक्खणं जंपमाणो परमसोगमुव्वहंतेण सिस्सगणेण सिसिरोवयारकारिणा परिवुडो दिणे गमेइ।

श्रमणाः! यः इदं गोशालेन मम वधार्थं तेजः निःसृष्टं तत्खलु अङ्ग-वङ्ग-मगध-मलय-मालव-अच्छ-वत्स-कोच्छ-पाट-लाट-वज्जि-मासि-कासि-कोशलाऽवाह-सुभुत्तराऽभिधानान् षोडश जनपदान् उच्छादनाय भस्मराशिकरणाय समर्थम् 'इति उक्ते विस्मितहृदयाः मुनयः जाता।

सश्च गोशालः कोटरनिहितहुतवहः तरुः इव निर्दह्यमानः कुत्राऽपि रतिं अलभमानः तस्य दाहस्य प्रशमनार्थं करकलितेन भाजनेन मद्यपानकं पिबन्, तद्वशसम्भूतमदेन च अभिक्षणं गायन्, अभिक्षणं नृत्यन्, अभिक्षणं हालाहलां कुम्भकारीं अञ्जलिप्रग्रहपूर्वकं प्रणामं कुर्वन्, अभिक्षणं भाण्डनिमित्तकुट्टितमृत्तिकान्तःनिहितशिशिरकलिलसलिलेन शरीरम् उपसिञ्चन्, असमञ्जसं प्रतिक्षणं जल्पन्, परमशोकमुद्वहता शिष्यगणेन शिशिरोपचारकारिणा परिवृत्तः दिनानि गमयति।

કે-'હે સાધુઓ! આ ગોશાળાએ મારા વધને માટે જે તેજ કાઢ્યું હતું, તે તેજ અંગ, વંગ, મગધ, મલય, માલવ, અચ્છ, વચ્છ, કોચ્છ, પાટ, લાટ, વજ્જિ, માસી, કાશી, કોશલ, અવાહ અને સુભુત્તર નામના સોળ દેશોને ઉખેડી નાંખવામાં અને તેને ભસ્મરાશિ કરવામાં સમર્થ હતું.' આ પ્રમાણે ભગવાનના કહેવાથી સર્વ સાધુઓ હૃદયમાં વિસ્મય પામ્યા.

હવે તે ગોશાળો જેના કોટરમાં અગ્નિ નાંખેલો હોય એવા વૃક્ષની જેમ બળતો, કોઇ પણ ઠેકાણે પ્રીતિને નહીં પામતો, તે દાહની શાંતિને માટે હાથમાં રાખેલા પાત્રવડે મદિરાપાન કરતો, તે મદિરાના વશથી ઉત્પન્ન થયેલા મદ(કેફ)વડે વારંવાર ગાયન કરતો, વારંવાર નૃત્ય કરતો, વારંવાર હાલાહલા નામની કુંભારણને બે હાથ જોડવાપૂર્વક પ્રણામ કરતો અને વાસણ બનાવવા માટે કુટેલી માટીમાં નાખેલા ઠંડા ઘણા અગ્રાહ્ય પાણીવડે શરીરને સીંચતો, ક્ષણે ક્ષણે જેમ તેમ અપશબ્દોને બોલતો તથા મોટા શોકને વહન કરતા અને શિશિર ઉપચારને કરતા શિષ્યવર્ગવડે પરિવરેલો તે દિવસોને પસાર કરવા લાગ્યો.

तत्थ य सावत्थीए नयरीए **अयंपुलो** नाम आजीविओवासओ परिवसइ। सो य पुव्वरत्तावरत्तसमयंमि धम्मजागरियं जागरमाणो जायसंसओ विचिंतेइ-'अहमेयं सम्मं न मुणामि-तणगोवालिया किं संठाणा हवइ? ता गच्छामि धम्मायरियं धम्मोवएसगं समुप्पन्नदिव्वनाणदंसणं सव्वन्नुं गोसालं हालाहलाए कुंभकारीए आवणंमि वट्टमाणमापुच्छामि'त्ति संपेहित्ता समुग्गयंमि दिणयरे अप्पमहग्घाभरणालंकियसरीरो साओ गिहाओ पडिनिक्खमित्ता पायविहारचारेणं कइवयपुरिसपरियरिओ गोसालयाभिमुहं गंतुं पयट्टो, कमेण य कुंभारावणसमीवमणुपत्तो समाणो तं गोसालं करकलियभायणमभिक्खणं मइरापाणं कुणमाणं, नच्चमाणं, गायमाणं, हालाहलाए कुंभकारीए अंजलिं विरयंतं, मट्टियासलिलेणं सरीरं परिसिंचमाणं, असंबद्धाइं वयणाइं पयंपमाणं पेच्छिऊण लज्जावसविमिलायंतलोयणो सहसच्चिय सणियं सणियं पच्चोसक्कंतो झडत्ति समीवट्ठिएहिं दिट्ठो गोसालयसिस्सेहिं। तओ वाहरिऊण

तत्र च श्रावस्त्यां नगर्यां **अयंपुलः** नामकः आजीविकोपासकः परिवसति। सश्च पूर्वरात्राऽपररात्रसमये धर्मजागरिकां जाग्रन् जातसंशयः विचिन्तयति 'अहमेतत् सम्यग् न जानामि, तृणगोपालिका किं संस्थाना भवति? ततः गच्छामि धर्माचार्यं धर्मोपदेशकं समुत्पन्नदिव्यज्ञानदर्शनं सर्वज्ञं गोशालं हालाहलायाः कुम्भकार्याः आपणे वर्तमानम् आपृच्छामि इति सम्प्रेक्ष्य समुद्गते दिनकरे अल्पमहार्घाऽऽभरणाऽलङ्कृतशरीरः स्वकात् गृहात् प्रतिनिष्क्रम्य पादविहारचारेण कतिपयपुरुषपरिवृत्तः गोशालकाऽभिमुखं गन्तुं प्रवृत्तः, क्रमेण च कुम्भकाराऽऽपणसमीपमनुप्राप्तः सन् तं गोशालं करकलितभाजनम् अभिक्षणं मदिरापानं कुर्वन्, नृत्यन्, गायन्, हालाहलां कुम्भकारीं अञ्जलिं विरचयन् मृत्तिकासलिलेन शरीरं परिसिञ्चन्, असम्बद्धानि वचनानि प्रजल्पन् प्रेक्ष्य लज्जावशविम्लानलोचनः सहसा एव शनैः शनैः प्रत्यवष्वस्कन् झटिति समीपस्थितैः दृष्टः गोशालकशिष्यैः। ततः व्याहृत्य भणितः तैः 'भोः

હવે તે શ્રાવસ્તિ નગરીમાં **अयंपुल** નામનો આજીવિક મતનો ઉપાસક શ્રાવક વસતો હતો. તે મધ્ય રાત્રિને સમયે ધર્મજાગરિકાવડે જાગતો સંશય થવાથી વિચાર કરવા લાગ્યો કે-'હું આ સમ્યક્ પ્રકારે નથી જાણતો કે-તૃણગોવાલિકા જાતિનો જીવ કેવા સંસ્થાનવાળો છે? આ સંશય પૂછવા માટે ધર્માચાર્ય, ધર્મોપદેશક, દિવ્ય જ્ઞાન-દર્શનને ધારણ કરનારા, સર્વજ્ઞ અને હાલાહલા નામની કુંભારણની દુકાનમાં રહેલા ગોશાળકની પાસે જાઉં, અને પૂછું.' એમ વિચારીને સર્યોદય થયો ત્યારે થોડા અને મોટા મૂલ્યવાળા અલંકારોવડે શરીરને વિભૂષિત કરી, પોતાના ઘરથી પગે ચાલતો કેટલાક પુરુષોને સાથે લઇ ગોશાળાની સન્મુખ જવા નીકળ્યો. અને અનુક્રમે તે કુંભારણની દુકાન સમીપે આવ્યો. ત્યાં તે ગોશાળો હાથમાં રહેલા પાત્રવડે વારંવાર મદિરાપાન કરતો, નૃત્ય કરતો, ગાયન ગાતો, હાલાહલા કુંભારણને બે હાથ જોડીને પ્રણામ કરતો, માટીના જળવડે શરીરને સીંચતો અને અસંબંદ્ધ વચનને બોલતો રહેલો હતો. તેને જોઇને લજ્જાના વશથી તેનાં નેત્રો મીંચાઇ ગયાં, અને તત્કાળ ધીમે ધીમે પાછો વળ્યો. તેટલામાં પાસે રહેલા ગોશાળાના શિષ્યોએ તેને તરત જ જોયો, તેથી તેને બોલાવીને કહ્યું કે-'હે અયંપુલ!

भणिओ-तेहिं-'भो अयंपुल! तुमं पच्छिमरयणीए तणगोवालियासंठाणविसयं संसयं पकओसि।' अयंपुलेण भणियं-'भयवं! एवमेयं।' पुणोऽवि गोसालगदुव्विलसियगोवणट्ठया भणियं तेहिं-'भो अयंपुल! जं च तुह गुरू हत्थगयभायणे जाव अंजलिं विरयंतो विहरइ तत्थवि एस भगवं इमाइं निव्वाणगमणसूयगाइं पज्जंतलिंगाइं वागरेइ, तंजहा-

चरिमं गेयं, चरिमं नट्टं, चरिमं अंजलिकम्मं, चरिमं पाणं अन्नं च मट्टियासीयलसलिल-सरीराणुलिंपणपमुहं वावारं, ता अयंपुल! भगवओ चउवीसमतित्थगरस्स गोसालगस्स पुव्वभणियलिंगेहिं सूइओ संपइ निव्वाणगमणपत्थाओ वट्टइ। तम्हा गच्छ तुमं स एव तुह धम्मायरिओ इमं वागरणं वागरिही।' एवं च सोच्चा सो दढहरिसुच्छलंतपुलयजालो तदभिमुहं गंतुं पयट्टो। ते आजीवियथेरा सिग्घयरं गंतूण गोसालगस्स अयंपुलागमणं निवेएंति, तं च मज्जभायणाइ एगंते परिच्चयावेंति, आसणंमि य निवज्जाविंति। एत्थंतरे पत्तो अयंपुलो

अयंपुल! त्वं पश्चिमरजन्यां तृणगोपालिकासंस्थानविषयं संशयं प्रकृतवान् असि।' अयंपुलेन भणितं 'भगवन् एवमेव।' पुनरपि गोपालकदुर्विलसितगोपनार्थं भणितं तैः 'भोः अयंपुल! यच्च तव गुरुः हस्तगतभाजने यावद् अञ्जलिं विरचयन् विहरति तत्राऽपि एषः भगवान् इमानि निर्वाणगमनसूचकानि पर्यन्तलिङ्गानि व्याकरोति। तद्यथा -

चरमं गेयं, चरमं नाट्य, चरमं अञ्जलिकर्म, चरमं पानं अन्यं च मृत्तिकाशीतलसलिलशरीराऽनु-लिम्पनप्रमुखं व्यापारम्, ततः अयंपुल! भगवतः चतुर्विंशतितमतीर्थकरस्य गोशालकस्य पूर्वभणितलिङ्गैः सूचितः सम्प्रति निर्वाणगमनप्रस्तावः वर्तते। तस्माद् गच्छ त्वम्, सः एव तव धर्माचार्यः इदं व्याकरणं व्याकरिष्यति।' एवं च श्रुत्वा सः दृढहर्षोच्छलत्पुलकजालः तदभिमुखं गन्तुं प्रवृत्तवान्। ते आजीविक-स्थविराः शीघ्रतरं गत्वा गोशलकस्य अयंपुलाऽऽगमनं निवेदयन्ति, तानि च मद्यभाजनानि एकान्ते

તમે પાછલી રાત્રીએ તૃણગોવાલિયાના સંસ્થાન વિષેનો સંશય કર્યો હતો.' ત્યારે અયંપુલે કહ્યું કે-'હે પૂજ્ય! હા, એમ જ છે.' ફરીથી તેઓએ ગોશાળાની આ દુષ્ટ ચેષ્ટાને ગુપ્ત કરવા માટે કહ્યું કે - 'હે અયંપુલ! આ તમારા ગુરુ હાથમાં પાત્ર રાખીને યાવત્ હાથ જોડતા જે રહ્યા છે, તે આ ભગવાન નિર્વાણગમનને સૂચવનારા આ છેવટના ચિહ્નોને જણાવે છે. તે આ પ્રમાણે :-

છેલ્લું ગાયન, છેલ્લું નૃત્ય, છેલ્લું અંજલિકર્મ, છેલ્લું પાન, અન્ન અને માટીના શીતળ જળવડે શરીરને લીંપવું વિગેરે વ્યાપાર છે, તે હે અયંપુલ! આ ચોવીશમા તીર્થંકર ગોશાલક ભગવાનનો પૂર્વે કહેલા ચિહ્નોવડે સૂચવેલો મોક્ષગમનનો અવસર વર્તે છે, તેથી તમે તેમની પાસે જાઓ, તે જ તમારા ધર્માચાર્ય તમારા સંશયનો ઉત્તર આપશે.' આ પ્રમાણે સાંભળીને તે અયંપુલના શરીરમાં મોટા હર્ષવડે રોમાંચનો સમૂહ ઉત્પન્ન થયો. એટલે તે તેમની તરફ જવા લાગ્યો. તે વખતે આજીવિકના મતના સ્થવિર સાધુઓએ શીઘ્રપણે પહેલાં જઇને તે ગોશાળાને તે અયંપુલના

तिक्खुत्तो य पयाहिणीकाऊण परेणं विणएणं वंदित्ता गोसालयं निसण्णो समुचियासणे, तओ गोसालएण भणियं-'भो अयंपुल तुमं पच्छिमरयणीसमयंमि इमं संसयमुव्वहसि जहा तणगोवालिया किंसंठाणसंठियत्ति, नणु वंसीमूलसंठिया सा पन्नत्त'त्ति। इमं च निसामिऊण पहिट्ठहियओ पुणो तं वंदिऊण गओ सो सट्ठाणं। अन्नम्मि य वासरे ईसि समुवलद्धचेयणो गोसालो नियमरणसमयमाभोइऊण अप्पणो सिस्से सद्दावेइ, तेसिं पुरओ य इमं वागरेइ-'भो देवाणुप्पिया! मं कालगयं जाणिऊण मम सरीरं सुरहिगंधोदएण पक्खालिऊण, सरसेण चंदणेण चच्चिऊण य, महरिहं हंसलक्खणं पडयं नियंसावेज्जह, तयणंतरं सव्वालंकारविभूसियं सहस्सवाहिणीसिबिगासमारोवियं काऊण नीहरावेज्जह, सावत्थीए पुरीए सिंघाडग-तिय-चउक्क-चच्चरेसु इमं उग्घोसिज्जह, जहा-इमीए ओसप्पिणीए चउवीसाए तित्थयराणं

परित्याजयन्ति, आसने च निषादयन्ति। अत्रान्तरे प्राप्तः अयंपुलः, त्रिधा च प्रदक्षिणीकृत्य परेण विनयेन वन्दित्वा गोशालकं निषण्णः समुचिताऽऽसने ततः गोशालकेन भणितं भोः अयंपुल!, त्वं पश्चिमरजनीसमये इदं संशयमुद्वहसि यथा तृणगोपालिका किंसंस्थानसंस्थिता? ननु वंशमूलसंस्थिता सा प्रज्ञप्ता।' इदं च निश्रुत्य प्रहृष्टहृदयः पुनः तं वन्दित्वा गतः सः स्वस्थानम्। अन्ये च वासरे ईषत् समुपलब्धचैतन्यः गोशालः निजमरणसमयमाभोग्य आत्मनः शिष्यान् शब्दयति, तेषां पुरतः च इदं व्याकरोति 'भोः देवानुप्रियाः! मां कालगतं ज्ञात्वा मम शरीरं सुरभिगन्धोदकेन प्रक्षाल्य, सरसेन चन्दनेन चर्चित्वा च, महार्घं हंसलक्षणं पटं निवासयत, तदनन्तरं सर्वालङ्कारविभूषितं सहस्रवाहिनीशिबिकासमारोपितं कृत्वा निहारयत। श्रावस्त्याः पुर्याः शृङ्घाटक-त्रिक-चतुष्क-चत्वरेषु इदं उद्घोषयत यथा 'अस्यां अवसर्पिण्यां चतुर्विंशतीनां तीर्थकराणां चरमः एव गोशालकजिनः

આગમનની વાત કરી, અને તે મદિરાના પાત્રાદિક એકાંતે દૂર નંખાવી દીધાં તથા આસન ઉપર બેસાડ્યો. તેટલામાં તે અયંપુલ આવ્યો, અને ત્રણ વાર પ્રદક્ષિણા કરીને મોટા વિનયવડે ગોશાલકને વાંદીને યોગ્ય આસને બેઠો.

ત્યારે ગોશાલકે કહ્યું-'હે અયંપુલ! તને પાછલી રાત્રિએ આ પ્રમાણે સંશય થયો હતો કે-તૃણગોવાલિયા કયા સંસ્થાનવાળા છે? તો નિશ્ચે તેનું સ્થાન વંશીના મૂળ જેવું કહ્યું છે.' આ પ્રમાણે સાંભળીને હૃદયમાં હર્ષ પામેલો તે ફરીથી તેમને વાંદી પોતાને સ્થાને ગયો. હવે બીજે દિવસે ગોશાળાને કાંઇક ચેતના પ્રાપ્ત થઇ ત્યારે તેણે પોતાનો મરણસમય પાસે આવેલો જાણી, પોતાના શિષ્યોને બોલાવ્યા અને તેમની પાસે આ પ્રમાણે કહ્યું કે-'હે દેવાનુપ્રિયો! મને કાળધર્મ પામેલો જાણીને તમે મારા શરીરને સુગંધી ગંધોદકવડે સ્નાન કરાવી, રસવાળા ચંદનવડે પૂજા કરીને મોટા મૂલ્યવાળું હંસની જેવું કોમળ-ઉજ્જ્વલ વસ્ત્ર પહેરાવજો. ત્યારપછી સર્વ અલંકારોવડે ભૂષિત કરી, હજાર પુરુષો ઉપાડે તેવી શિબિકામાં સ્થાપન કરી નીહરણનો ઉત્સવ કરજો. તે વખતે શ્રાવસ્તિ નગરીમાં શૃંગાટક, ત્રિક, ચતુષ્ક અને ચત્વરમાં આ પ્રમાણે આઘોષણા કરજો કે-આ અવસર્પિણીમાં ચોવીશ તીર્થંકરોમાં આ છેલ્લા ગોશાલક

चरिमो एस गोसालगजिणो तित्थयरत्तं पालिऊण समुप्पन्नकेवलो संपयं सिद्धिं गओ'त्ति। इमं निसामिऊण ते सिस्सा विणएणं सव्वं पडिसुणंति। अह सत्तमदिणंमि परिणममाणंमि समुवलद्धसुद्धबुद्धिणा पुव्वदुच्चरियनिवहसुमरणुप्पन्नातुच्छपच्छायावेण चिंतियं गोसालेण-

अहह महापावोऽहं अजिणंपि जिणं भणामि अप्पाणं।
सच्चं च मुसावयणंपि मुद्धलोयस्स साहेमि ।।१।।

सिरिवद्धमाण तित्थंकरो गुरू धम्मदेसगो परमो।
आसाइओ मए तह तेयनिसग्गेण दुग्गेण ।।२।।

दुद्धरसंजमभरधरणपच्चले मुणिवरे दहंतेण।
निद्दड्ढ च्चिय बोही मए हयासेण एमेव ।।३।।

तीर्थकरत्वं पालयित्वा समुत्पन्नकेवलः साम्प्रतं सिद्धिं गतः।' इदं निःशम्य ते शिष्याः विनयेन सर्वं प्रतिश्रुण्वन्ति। अथ सप्तमदिने परिणते समुपलब्धशुद्धबुद्धिना पूर्वदुश्चरितनिवहस्मरणोत्पन्नाऽतुच्छ पश्चात्तापेन चिन्तितं गोशालकेन -

अहह! महापापः अहं अजिनमपि जिनं भणामि आत्मानम्।
सत्यं च मृषावचनमपि मुग्धलोकस्य कथयामि ।।१।।

श्रीवर्द्धमानः तीर्थकरः गुरुः धर्मदेशकः परमः।
आशातितः मया तथा तेजोनिसर्गेण दुर्गेण ।।२।।

दुर्धरसंयमधरणप्रत्यलं मुनिवरं दहता।
निर्दग्धः एव बोधिः मया हताशेन एवमेव ।।३।।

નામના જિનેશ્વર તીર્થંકરપણું પાળી કેવળજ્ઞાન પામી હમણાં મોક્ષે ગયા.' આ પ્રમાણે તેનું વચન સાંભળીને તે શિષ્યોએ વિનયવડે તે વચન અંગીકાર કર્યું. હવે સાતમો દિવસ આવ્યો ત્યારે ગોશાળાને શુદ્ધ બુદ્ધિ ઉત્પન્ન થઇ, અને પૂર્વના દુષ્ટ ચરિત્રોનો સમૂહ સ્મરણમાં આવવાથી તેને ઘણો પશ્ચાત્તાપ થવા લાગ્યો. તેથી તે વિચાર કરવા લાગ્યો કે-

'અહો! ખેદની વાત છે કે-હું મહાપાપી છું. ખરેખર હું જિન નહીં છતાં પણ મારા આત્માને હું જિન કહું છું, મુગ્ધલોકોની પાસે હું મૃષાવચન બોલું છું, (૧)

શ્રીવર્ધમાનસ્વામી તીર્થંકર મારા ગુરુ અને પરમ ધર્મોપદેશક છે, તેના પર મેં ભયંકર તેજોલેશ્યા મૂકીને તેમની આશાતના કરી, (૨)

તથા દુઃખે કરીને પાળી શકાય એવા સંયમના ભારને ધારણ કરવામાં સમર્થ મુનિવરોને બાળી નાંખવાથી હણાયેલી આશાવાળા મેં એમ ને એમ જ મારી બોધિને પણ બાળી નાંખી. (૩)

सच्छंदं उम्मग्गं पयट्टमाणेण तह महीवट्ठे।
अप्पा न केवलो च्चिय लोगोऽवि भवन्नवे खित्तो ।।४।।

अहवा समग्गभुवणत्तएऽवि तं नत्थि पावठाणमहो।
जं कइवयदिणकज्जे मए अणज्जेण नो विहियं ।।५।।

तं चोज्जं जं इमिणावि दुट्ठदेहेण पावभरगुरुणा।
जमवयणंपिव भीमं अज्जवि नासं न वच्चामि ।।६।।

मुद्धेण मए चिरजीवियत्थिणा कवलियं हि तालउडं।
आगामियमसुहमतक्किऊण जं एवमायरियं ।।७।।

स्वच्छन्दं उन्मार्गं प्रवर्तमानेन तथा महीपृष्ठे।
आत्मा न केवलः एव लोकः अपि भवार्णवे क्षिप्तः ।।४।।

अथवा समग्रभुवनत्रयेऽपि तन्नास्ति पापस्थानम् अहो!।
यत् कतिपयदिनकार्येण मया अनार्येण नो विहितम् ।।५।।

तन्नोद्यम् यद् अनेनाऽपि दुष्टदेहेन पापभरगुरुणा।
यमवदनमिव भीमं अद्याऽपि नाशं न व्रजामि ।।६।।

मुग्धेन मया चिरजीवितार्थिना कवलितं हि तालपुटम्।
आगामिकम् अशुभम् अतर्कयित्वा यदेवम् आचरितम् ।।७।।

આ પૃથ્વી પર સ્વેચ્છાએ ઉન્માર્ગમાં પ્રવર્તતા મેં મારો આત્મા જ માત્ર ભવસમુદ્રમાં નાંખ્યો એમ નથી, પણ ઘણા લોકોને પણ ભવસમુદ્રમાં નાંખ્યા, (૪)

અથવા તો સમગ્ર ત્રણ ભુવનમાં પણ એવું કોઇ પાપસ્થાનક નથી કે જે પાપ થોડા દિવસને માટે થઇને અનાર્ય એવા મેં ન કર્યું હોય. (૫)

એ જ આશ્ચર્ય છે કે-પાપના ભારથી ભારે થયેલા આ દુષ્ટ શરીરવડે હજુ સુધી હું યમરાજના મુખ જેવા ભયંકર નાશને પામ્યો નથી. (૬)

મુગ્ધ એવા મેં ચિરકાળ જીવવાની ઇચ્છાથી તાલપુટ વિષ ખાધું, કે જેથી ભવિષ્ય કાલમાં પ્રાપ્ત થતા અશુભને નહીં ધારીને જ મેં આવું આચરણ કર્યું.' (૭)

इय वेरग्गमुवगओ गोसालो तह न तेउलेसाए।
संतप्पइ जह तेणं सपुव्वदुच्चरियवग्गेण ।।८।।

एवं च सुचिरं परिझुरिऊण सो नियसिस्सगणं उच्चावयसवहसावियं काऊणं एवं भणिउं पवत्तो-'भो महाणुभावा! नो खलु अहं जिणो सव्वन्नू सव्वदरिसीवि, किंतु गोसालो मंखलिपुत्तो भगवओ वद्धमाणतित्थंकरस्स सिस्सोऽवि होऊण पच्चणीओ, समणघायगो नियतेएण चेवाभिहओ छउमत्थो विणस्सिउकामो डंभमेत्तपयट्टियपउट्ठपरिहाराइदुन्नओ एत्तियकालमप्पाणं परं च वुग्गाहंतो विहरिओ, अओ एवंविहमहापावकारिणं कालगयं जाणित्ता तुब्भे वामचलणंमि रज्जूए बंधित्ता इमाए सावत्थीए पुरीए सव्वत्थ सिंघाडगाइसु आकड्ढिविकड्ढिं कुणमाणा, तिक्खुत्तो वयणंमि निट्ठीवणं पक्खिवंता, एसो सो गोसालो

इति वैराग्यमुपगतः गोशालकः तथा न तेजोलेश्यया।
सन्तप्यते यथा तेन स्वपूर्वदुश्चरितवर्गेण ।।८।।

एवं च सुचिरं परिशुच्य सः निजशिष्यगणं उच्चावचशपथशापितं कृत्वा एवं भणितुं प्रवृत्तवान् 'भोः महानुभावाः! नो खलु अहं जिनः, सर्वज्ञः, सर्वदर्शी अपि, किन्तु गोशालकः मङ्खलिपुत्रः भगवतः वर्द्धमानतीर्थकरस्य शिष्यः अपि भूत्वा प्रत्यनीकः, श्रमणघातकः निजतेजसा एव अभिहतः छद्मस्थः विनंष्टुकामः दम्भमात्रप्रवर्तितपरिवर्तपरिहारादिदुर्नयः एतावत्कालम् आत्मानं परं च व्युद्ग्राहयन् विहृतः। अतः एवंविधमहापापकारिणां कालगतं ज्ञात्वा यूयं वामचरणं रज्जुना बद्ध्वा अस्यां श्रावस्त्यां पुर्यां सर्वत्र शृङ्घाटकादिषु आकर्षविकर्षं कुर्वाणाः, त्रिधा वदने निष्ठ्यूतं प्रक्षिपन्तः, 'एषः सः

આ પ્રમાણે વૈરાગ્ય પામેલો ગોશાળો તે પોતાના પૂર્વ દુરાચારના સમૂહવડે જેવો તાપ પામ્યો તેવો પોતાની તેજોલેશ્યાથી તાપ પામ્યો નહીં. (૮)

આ પ્રમાણે ચિરકાળ સુધી ઝુરીને તે પોતાના શિષ્યગણને બોલાવી ઊંચા-નીચા સોગનવડે બંધવીને આ પ્રમાણે કહેવા લાગ્યો કે-'હે મહાનુભાવો! હું ખરેખર સર્વજ્ઞ અને સર્વદર્શી જિનેશ્વર નથી, પરંતુ મંખલીપુત્ર ગોશાળો છું. ભગવાન વર્ધમાનસ્વામી તીર્થંકરનો શિષ્ય થઇને પણ તેનો જ પ્રત્યનીક (શત્રુ) થઈ મેં સાધુઓનો ઘાત કર્યો, અને મારા પોતાના જ તેજથી હણાઈને છદ્મસ્થપણે જ વિનાશ પામવાનો કામી કેવળ દંભથી જ 'જીવ મરીને તે જ શરીરમાં ઉત્પન્ન[1] થાય છે' વિગેરે અન્યાયમાં પ્રવર્તન કરી આટલા કાળ સુધી મારા આત્માને તથા બીજાઓને પણ ભમાવી રહ્યો છું. તેથી આવા પ્રકારના મહાપાપને કરનારા મને મરેલો જાણીને તમે મારા ડાબા પગે દોરડું બાંધી, આ શ્રાવસ્તિ નગરીમાં સીંઘાટક વિગેરે સર્વ માર્ગોમાં મારા શરીરને ઘસડીને, ત્રણ વાર મારા મુખમાં

---

૧. આવો ગોશાળાનો મત છે.

मंखलिपुत्तो अजिणो गुरुपडिणीओ समणघायगो असेसदोसकारी, भयवं पुण महावीरो जिणो तित्थयरो उप्पन्नदिव्वनाणदंसणो सच्चवाई कारुणिओ धम्मदेसगोत्ति महया सद्देण उग्घोसमाणा य मम सरीरस्स नीहरणं करेज्जह'त्ति भणिऊण दारुणवेयणाभिहयसरीरो मओ गोसालोत्ति। तं च कालगयं जाणित्ता ते आजीवित्थेरा नियगुरुपक्खवायमुव्वहंता कुंभकारावणस्स दुवारं पिहिऊण तस्स मज्झयारे सावत्थिं नयरिमालिहंति, तओ गोसालगस्स वामपायरज्जुबंधणपमुहं आघोसणापज्जवसाणं सवहपरिमोक्खणं करेंति, तयणंतरं च तं सरीरगं सुरहिसलिलेहिं ण्हाविऊण तप्पक्खवायपडिवन्नजणथिरिकरणट्ठया महया पूयासक्कारसमुदएणं सिबियाए समारोविऊण नीहरावेंति, मयकिच्चाणि य कुणंति।

इओ य भगवं महावीरो सावत्थीओ नयरीओ निक्खमिऊण विहारक्कमेण गओ

गोशालः मङ्खलिपुत्रः अजिनः गुरुप्रत्यनीकः श्रमणघातकः अशेषदोषकारी, भगवान् पुनः महावीरः जिनः, तीर्थकरः, उत्पन्नदिव्यज्ञानदर्शनः, सत्यवादी, कारुणिकः, धर्मदेशकः' इति महता शब्देन उद्घोषयन्तः च मम शरीरस्य निहरणं कुरुत 'इति भणित्वा दारुणवेदनाऽभिहतशरीरः मृतः गोशालः। तं च कालगतं ज्ञात्वा ते आजीविकस्थविराः निजगुरुपक्षपातमुद्वहन्तः कुम्भकाराऽऽपणस्य द्वारं पिहित्वा तस्य मध्ये श्रावस्तीं नगरीं आलिखन्ति। ततः गोशालकस्य वामपादरज्जुबन्धनप्रमुखं आघोषणापर्यवसानं शपथपरिमोक्षणं कुर्वन्ति, तदनन्तरं च तत्शरीरं सुरभिसलिलैः स्नापयित्वा तत्पक्षपातप्रतिपन्नजनस्थिरीकरणार्थं महता पूजासत्कारसमुदायेन शिबिकायां समारोप्य निहारयन्ति, मृतकृत्यानि च कुर्वन्ति।

इतश्च भगवान् महावीरः श्रावस्त्याः नगर्याः निष्क्रम्य विहारक्रमेण गतः **मेंढकग्राम**नगरे, समवसृतश्च

થુંકીને-'તે આ ગોશાળો મંખલીપુત્ર જિન નહિં છતાં ગુરુનો પ્રત્યનીક(= શત્રુ) થઈ, સાધુઓનો ઘાત કરી સમગ્ર દોષોને કરનાર થયો છે. અને ભગવાન તો મહાવીર સ્વામી જિનેશ્વર, તીર્થંકર, દિવ્ય(કેવળ)જ્ઞાન-દર્શનને ધારણ કરનારા, સત્યવાદી, દયાળુ અને ધર્મોપદેશક છે.' આ પ્રમાણે મોટા શબ્દવડે ઉદ્ઘોષણા કરતા તમે મારા શરીરનું નીહરણ = વિસર્જન કરજો.' એમ કહીને દારુણ વેદનાથી હણાયેલા શરીરવાળો તે ગોશાળો મરણ પામ્યો. તેને મરણ પામ્યો જાણીને તે આજીવિક મતના સ્થવિર સાધુઓએ, પોતાના ગુરુનાં પક્ષપાતને કરનારા હોવાથી, તે કુંભારની શાળાના સર્વ દ્વારો બંધ કરી, તેની મધ્યે શ્રાવસ્તિ નગરી આલેખી, પછી સોગનથી મુક્ત થવા માટે ગોશાળાના ડાબા પગે દોરડું બાંધવું વિગેરેથી લઈને આઘોષણા પર્યંત સર્વ કર્યું. પછી તે શરીરને સુગંધી જળવડે સ્નાન કરાવી, તેના પક્ષમાં રહેલા લોકોને સ્થિર કરવા માટે મોટા પૂજા સત્કારના સમુદાયે કરીને શિબિકામાં આરોપણ કરી નીહરણ કર્યું અને મરણકાર્ય કર્યું.

ત્યારપછી ભગવાન મહાવીરસ્વામી શ્રાવસ્તિ નગરીમાંથી નીકળી વિહારના ક્રમે **મેંઢકગ્રામ** નામના નગરમાં

मिंढियगामनयरे, समोसढो य **मणिकोट्ठ**याभिहाणचेइयंमि, धम्मनिसामणत्थं च परिसा समागया, खणमेगं च पज्जुवासिऊण जहागयं पडिगया। अह भगवओ महावीरस्स तेण तेउलेसापरितावसेण समुप्पन्नो पित्तजरो, तव्वसेण य पाउब्भूओ रुहिराइसारो, रविकरपडिबोहियकणयकमलसच्छहंपि मिलायलायन्नं जायं वयणकमलं, सरयदिणयरसमुज्जलावि विच्छाईभूया देहच्छवी, वियसियकुवलयदलदीहरंपि मउलावियं लोयणजुयलं, महानगरगोउरपरिहाणुरूवंपि किसत्तणमुवगयं बाहुदंडजुयलंति। एवंविहं च भगवओ सरीरलच्छिं पिच्छमाणो मुद्धजणो वाहरिउमारद्धो-'अहो भगवं महावीरो गोसालगतवतेयजणियपित्तज्जरविहुरियसरीरो छण्हं मासाणमब्भंतरे परलोयं वच्चिस्सइ'त्ति। इमं च पवायं जणपरंपराओ निसामिऊण **सीहो** नाम भगवओ सिस्सो गुरुपेम्माणुरागेण एगंते गंतूण अहिययरमन्नुब्भररुद्धकंठविवरो कहकहविगब्भिणं रोविउं पयत्तो। इओ य केवलावलोएण अवलोइऊण भगवया वाहराविओ एसो, भणिओ य-

---

मणिकोष्ठकाऽभिधानचैत्ये, धर्मनिश्रवणार्थं च पर्षदः समागताः, क्षणमेकं च पर्युपास्य यथागतं प्रतिगताः। अथ भगवतः महावीरस्य तेन तेजोलश्यापरितापवशेन समुत्पन्नः पित्तज्वरः, तद्वशेन च प्रादुर्भूतः रुधिराऽतिसारः, रविकरप्रतिबोधितकनककमलसदृशमपि म्लानलावण्यं जातं वदनकमलम्, शरददिनकरसमुज्ज्वलाऽपि विच्छायीभूता देहच्छविः, विकसित कुवलयदलदीर्घमपि म्लानीभूतं लोचनयुगलम्, महानगरगोपुर-परिखाऽनुरूपमपि कृशत्वमुपगतं बाहुदण्डयुगलम्। एवविधां च भगवतः शरीरलक्ष्मीं प्रेक्षमाणः मुग्धजनः व्याहर्तुमारब्धवान् 'अहो! भगवान् महावीरः गोशालकतपोतेजोजनितपित्तज्वरविधुरितशरीरः षण्मासाऽभ्यन्तरे परलोकं व्रजिष्यति।' इदं च प्रवादं जनपरम्परातः निःशम्य **सिंहः** नामकः भगवतः शिष्यः गुरुप्रेमाऽनुरागेण एकान्ते गत्वा अधिकतरमन्युभररुद्धकण्ठविवरः 'कहकह'विगर्भितं रोदितुं प्रवृत्तवान्। इतश्च केवलाऽऽलोकेन अवलोक्य भगवता व्याहारितः एषः भणितश्च

ગયા. ત્યાં **મણિકોષ્ઠક** નામના ચૈત્ય (ઉદ્યાન)માં સમવસર્યા. ધર્મ સાંભળવા માટે પર્ષદા ત્યાં આવી. ક્ષણ માત્ર ભગવાનની સેવા કરીને તે પર્ષદા જેમ આવી હતી તેમ પાછી ગઈ. હવે ભગવાન મહાવીરસ્વામીને તે તેજોલેશ્યાના તાપના વશે કરીને પિત્તજ્વર ઉત્પન્ન થયો. તેના વશથી શરીરમાં લોહીનો [1]અતિસાર (ઠલ્લો) પ્રગટ થયો, તેથી સૂર્યના કિરણોવડે વિકસ્વર થયેલા સુવર્ણકમળની જેવી કાંતિવાળું તેમનું મુખકમળ પણ કરમાઇ ગયેલા લાવણ્યવાળું થયું, શરદઋતુના પૂર્ણચંદ્રના જેવી ઉજ્જ્વળ દેહની કાંતિ પણ નિસ્તેજ થઈ ગઈ, વિકસ્વર પોયણાની પાંખડી જેવી લાંબા નેત્રો પણ બીડાઈ ગયાં, અને મોટા નગરના દરવાજાની ભોગળ જેવા લાંબા બાહુદંડનું યુગલ પણ કૃશપણાને પામ્યું. આવા પ્રકારની ભગવાનના શરીરની શોભા જોઈને મુગ્ધ જનો કહેવા લાગ્યા કે-'અહો! ભગવાન મહાવીરસ્વામીનું શરીર ગોશાળાના તપનાં તેજથી ઉત્પન્ન થયેલા પિત્તજ્વરથી વ્યાપ્ત થયું છે, તેથી તે છ માસની અંદર પરલોકમાં જશે.' લોકોની પરંપરાએ આવો જનપ્રવાદ સાંભળીને **સિંહ** નામના ભગવાનના શિષ્ય ગુરુ પરના પ્રેમના અનુરાગને લીધે એકાંતમાં જઈને, અત્યંત મોટા શોકના ભારથી કંઠવિવર રુંધાઈ ગયેલું હોવાથી ડસકા ખાઇખાઇને રોવા લાગ્યા. આ બાબત કેવળજ્ઞાનવડે જાણીને ભગવાને તેને

---

૧. લોહીખંડ મરડાનો વ્યાધિ.

किं तं जणप्पवायं निसामिउं कुणसि चित्तसंतावं?।
नेवावयाए कइयवि विउक्कमंतीह तित्थयरा ।।१।।

अन्नह संगमयविमुक्कचक्ककडपूयणाइजणिएहिं।
मरणं हविज्ज तइयावि मज्झं तिक्खेहि दुक्खेहिं ।।२।।

जो पुण तणुतणुयत्तणरुहिरइसाराइओ विगारो मे।
निरुवक्कमत्तणेणं सोऽवि न दोसं समावहइ ।।३।।

सीहेण तओ भणियं जइवि हु एवं तहावि जयनाह!।
तुम्हावयाए तप्पइ सयलं ससुरासुरं भुवणं ।।४।।

किं त्वं जनप्रवादं निःशम्य करोषि चित्तसन्तापम्?।
नैव आपदि कदाऽपि व्युत्क्रामन्ति तीर्थकराः ।।१।।

अन्यथा सङ्गमविमुक्तचक्र-कटपुतनादिजनितैः।
मरणं भवेत् तदाऽपि मम तीक्ष्णैः दुःखैः ।।२।।

यः पुनः तनुतनुत्व-रुधिरातिसारादिकः विकारः मम।
निरूपक्रमत्वेन सोऽपि न दोषं समावहति ।।३।।

सिंहेण ततः भणितं 'यद्यपि खलु एवं तथाऽपि जगन्नाथ!।
तव आपदि तपति सकलं ससुरासुरं भुवनम् ।।४।।

પોતાની પાસે બોલાવીને કહ્યું કે-

'હે સિંહ! લોકપ્રવાદ સાંભળીને તું ચિત્તમાં સંતાપ શા માટે કરે છે? કોઈ પણ વખત તીર્થંકરો આપદાએ કરીને વ્યુત્ક્રમણ કરતા નથી એટલે કે વિપરીતપણાને પામતા નથી. (૧)

જો કદાચ પામતા હોય તો તે વખતે (પહેલાં છદ્મસ્થ અવસ્થામાં) સંગમક દેવે મૂકેલા ચક્રવડે અને કટપૂતના વિગેરેએ ઉત્પન્ન કરેલા તીક્ષ્ણ દુઃખોવડે મારું મરણ થયું હોત. (૨)

વળી મને જે આ શરીરને કૃશપણું કરનાર રુધિરનો અતિસારાદિક વિકાર થયો છે તે પણ '[1]નિરુપક્રમપણાને લીધે દોષને કરનાર નથી.' (૩)

તે સાંભળી સિંહ સાધુએ કહ્યું કે-'જો કે આપ કહો છો તેમજ છે, તો પણ હે જગતનાથ! આપની આ આપદાને લીધે સુર અસુર સહિત સમગ્ર ભુવન તાપ પામે છે, (૪)

---

૧. નિરુપક્રમ એટલે આઘાત ન લાગે તે.

सिढिलियसज्झायज्झाणदाणपामोक्खधम्मवावारो।
चाउव्वन्नो संघोऽवि लहई नो निव्वुइं कहवि ।।५।।

ता पसियसु जयबंधव! अम्हारिसहिययदाहसमणत्थं।
उवइससु भेसहं जेण होइ देहं निरोगं भे ।।६।।

एवं कहिए तयणुकंपाए भगवया भणियं-'जइ एवं ता इहेव मिंढयग्गामे नयरे **रेवइए** गाहावइणीए समीवं वच्चाहि, ताए य ममनिमित्तं जं पुव्वं ओसहं उवक्खडियं तं परिहरिऊण इयरं अप्पणो निमित्तं निप्फाइयं आणेहित्ति। इमं निसामिऊण हरिसवसपयट्टपुलयपडला-उरसरीरो सीहो अणगारो समुट्ठिऊण भयवंतं वंदइ नमंसइ। तयणंतरं पडिग्गहं गहाय रेवईए गाहावइणीए गिहमुवागच्छइ। साऽवि रेवई तं अणगारं ईरियासमिइप्पमुहचरणगुणसंपन्नं

शिथिलितस्वाध्याय-ध्यान-दानप्रमुखधर्मव्यापारः।
चातुर्वर्णः सङ्घोऽपि लभते नो निवृतिं कथमपि ।।५।।

ततः प्रसीद! जगद्बान्धव! अस्मादृशहृदयदाहशमनार्थम्।
उपदिश भेषजं येन भवति देहः निरोगं भोः ।।६।।

एवं कथिते तदनुकम्पया भगवता भणितं 'यद्येवं ततः इहैव मेण्ढकग्रामे नगरे **रेवत्याः** गाथापतिन्याः समीपं व्रज, तया च मम निमित्तं यत्पूर्वम् औषधम् उपस्कृतं तत्परिहृत्य इतरम् आत्मनः निमित्तं निष्पादितं आनय।' इति निःशम्य हर्षवशप्रवृत्तपुलकपटलाऽऽपूरशरीरः सिंहः अणगारः समुत्थाय भगवन्तं वन्दते, नमति। तदनन्तरं प्रतिग्रहं गृहीत्वा रेवत्याः गाथापतिन्याः गृहमुपागच्छति। साऽपि

તથા સ્વાધ્યાય, ધ્યાન, દાન વિગેરે ધર્મના વ્યાપારને શિથિલ કરી ચતુર્વિધ સંઘ પણ કોઇ પણ રીતે સુખ પામતો નથી; (૫)

તેથી કરીને હે જગતબાંધવ! જે ઔષધવડે આપનું શરીર રોગ રહિત થાય, તે ઔષધ અમારી જેવાના હૃદયદાહને શમાવવા માટે બતાવો.' (૬)

આ પ્રમાણે તેણે કહ્યું ત્યારે તેની અનુકંપાને માટે ભગવાને કહ્યું કે- 'જો એમ છે તો આ જ મેંઢકગ્રામ નગરમાં **રેવતિ** નામની ગાથાપતિનીની પાસે તું જા. તેણીએ મારે માટે જે પહેલાં ઔષધ તૈયાર કરી રાખ્યું છે તેનો ત્યાગ કરીને બીજું ઔષધ તેણીએ પોતાને માટે બનાવ્યું છે, તેને તું લાવ.' આ પ્રમાણે સાંભળીને સિંહ સાધુનું શરીર હર્ષના વશથી ઉત્પન્ન થયેલા રોમાંચના સમૂહે કરીને વ્યાપ્ત થયું. પછી તેણે ઊભા થઈ ભગવાનને વંદન કર્યું, નમસ્કાર કર્યા. ત્યારપછી પાત્ર ગ્રહણ કરીને રેવતિ નામની ગાથાપતિનીને ઘેર ગયા. તે રેવતિ પણ ઈર્યાસિમિતિ વિગેરે ચારિત્ર ગુણે કરીને સહિત જાણે પ્રત્યક્ષ સાધુધર્મ જ હોય તેવા તે સાધુને પોતાના ઘરમાં પ્રવેશ કરતા જોઈને

समणधम्मं व पच्चक्खं गिहंमि पविसमाणमवलोइऊण खिप्पामेव आसणाओ अब्भुट्ठेइ, सत्तट्ठ पयाइं सम्मुहमवसप्पइ, सविणयं वंदिऊण य एवं जंपइ-'संदिसह भंते किमागमणकारणं?।' सीहेण भणियं-'जं तुमए वद्धमाणसामीं पडुच्च कयं तं मोत्तूण जं अत्तट्ठा निप्फाइयं ओसहं तं पणामेहि'त्ति। तीए भणियं-'भयवं! को एवंविहदिव्वनाणी जो रहसिकयंपि एवंविहं वइयरं परिजाणइ।' मुणिणा कहियं-'सयलभावाभाव-निब्भासणसमत्थकेवलावलोयनिलयं भयवंतं वीरजिणं मोत्तूणं को अन्नो एवंविहं साहिउं पारइ?।' एवं सोच्चा सा पहिट्ठहियया सायरं तमोसहं मुणिणो पडिग्गहंमि पक्खिवइ। तओ सा तेण भावविसुद्धभेसहप्पयाणेण देवाउयं कम्मं निबंधइ, देवा य तीसे गिहंमि कणगरासिं निसिरंति, 'महादाणं महादाणं'ति घोसंति, सीहोवि साहू तं गहाय भयवओ समप्पेइ, तं च भयवं आहारेइ, आहारिए य तहिं ववगयपित्तज्जरसमुत्थविगारो अमयपुन्नसरीरोव्व समहिगसमुम्मिल्लियजच्चकंचणसच्छहच्छवी

रेवती तं अनगारम् इर्यासमितिप्रमुखचरणगुणसम्पन्नं श्रमणधर्ममिव प्रत्यक्षं गृहे प्रविशन् अवलोक्य क्षिप्रमेव आसनतः अभ्युतिष्ठति, सप्ताऽष्टौ पदानि सम्मुखमुपसर्पति, सविनयं वन्दित्वा च एवं जल्पति 'सन्दिशत भदन्त! किमागमनकारणम्?।' सिंहेण भणितं 'यत् त्वया वर्द्धमानस्वामिनं प्रतीत्य कृतं तन्मुक्त्वा यद् आत्मार्थं निष्पादितं औषधं तद् अर्पय।' तया भणितं 'भगवन्! कः एवंविधदिव्यज्ञानी यः रहसिकृतमपि एवंविधं व्यतिकरं परिजानाति।' मुनिना कथितं 'सकलभावाभावनिर्भासनसमस्त-केवलाऽवलोकनिलयं भगवन्तं वीरजिनं मुक्त्वा कः अन्यः एवंविधं कथयितुं पारयति?।' एवं श्रुत्वा सा प्रहृष्टहृदया सादरं तदौषधं मुनेः प्रतिग्रहे प्रक्षिपति। ततः सा तेन भावविशुद्धभेषजप्रदानेन देवायुष्कं कर्म निबध्नाति, देवाः च तस्याः गृहे कनकराशिं निस्सरन्ति, 'महादानं महादानम्' इति घोषयन्ति। सिंहः अपि साधुः तं गृहीत्वा भगवते समर्पयति, तच्च भगवान् आहारयति, आहारिते च तत्र व्यपगतपित्तज्वरसमुत्थविकारः अमृतपूर्णशरीरः इव समधिकसमुन्मिलितजात्यकञ्चनसदृशछविः वीरः

શીઘ્રપણે આસન પરથી ઊભી થઈ, સાત આઠ પગલાં તેની સન્મુખ ગઈ, અને વિનય સહિત વંદના કરીને આ પ્રમાણે બોલી કે-'હે પૂજ્ય! આજ્ઞા આપો. આવવાનું પ્રયોજન શું છે?' સિંહ સાધુએ કહ્યું કે-'જે તમે શ્રી વર્ધમાનસ્વામીને ઉદ્દેશીને ઔષધ કર્યું છે તે મૂકીને જે તમારે માટે કર્યું છે તે ઔષધ આપો.' ત્યારે તે બોલી કે-'હે ભગવન! એવા પ્રકારના દિવ્ય જ્ઞાની કોણ છે કે જે મેં ગુપ્ત રીતે કરેલા આવા પ્રકારના વૃત્તાંતને જાણે છે?' મુનિએ કહ્યું કે-'સમગ્ર ભાવ અને અભાવને પ્રગટ કરવામાં સમર્થ એવા કેવળજ્ઞાનના સ્થાનરૂપ ભગવાન વીર જિનેશ્વરને મૂકીને બીજા કોણ આવા પ્રકારનું કહેવાને સમર્થ હોય?' આ પ્રમાણે સાંભળીને હર્ષિત હૃદયવાળી તેણીએ આદર સહિત તે ઔષધ મુનિના પાત્રમાં નાખ્યું. તે વખતે તેણીએ શુદ્ધ ભાવથી તે ઔષધ આપવાવડે દેવના આયુષ્યનું કર્મ બાંધ્યું. દેવોએ પણ તેણીના ઘરમાં સુવર્ણરાશિની વૃષ્ટિ કરી, અને 'અહો! મહાદાન, મહાદાન' એમ ઉદ્‌ઘોષણા કરી. સિંહ સાધુએ પણ તે ઔષધ લઈ ભગવાનને આપ્યું. ભગવાને તે ખાધું. પછી તે ઔષધ ખાવાથી પિત્તજ્વરથી ઉત્પન્ન થયેલો વિકાર નાશ પામવાથી ભગવાનનું શરીર અમૃતથી પૂર્ણ થયું હોય તેમ અત્યંત તેજસ્વી જાતિવંત સુવર્ણના

वीरो विराइउं पवत्तो। अह पडिहयरोगे वद्धमाणे जिणिंदे हरिसवियसियच्छो सव्वसंघोऽवि जाओ। असुरसुरसमूहा वद्धियाणंदभरा सह नियरमणीहिं नच्चिउं संपयत्ता।

गोयमसामीवि गणहरो महावीरं वंदिऊण पुच्छइ-'भयवं! तुब्भं कुसिस्सो गोसालो कालं काऊण कहिं उववन्नो?।' भयवया भणियं-'अच्चुयंमि देवलोगे बावीससागरोवमाऊ देवो जाओ'त्ति। गोयमेण भणियं-'भयवं! कहं तहाविहमहापावकरणेऽवि एवंविहदिव्वदेविड्ढिलाभो समुप्पण्णो'त्ति?। तओ सिट्ठो सामिणा से सव्वोऽवि मरणसमयसमुप्पन्नातुच्छपच्छायावाई वुत्तंतो। पुणोऽवि गोयमेण भणियं-'भयवं! तओ ठाणाओ सो आउक्खएण कहिं उववज्जिही?, कइया वा सिद्धिं पाविहि'त्ति?। भगवया जंपियं-'गोयम! निसामेहि-इहेव **जंबुद्दीवे** दीवे, **भारहे** वासे, **विंझगिरि**पायमूले **पुंडा**भिहाणंमि जणवए **सुमइ**स्स रन्नो **भद्दा**भिहाणाए देवीए

विराजितुं प्रवृत्तः। अथ प्रतिहतरोगे वर्द्धमाने जिनेन्द्रे हर्षविकसिताऽक्षः सर्वसङ्घोऽपि जातः। असुरसुरसमूहाः वर्धिताऽऽनन्दभराः सह निजरमणीभिः नर्तितुं सम्प्रवृत्ताः।

गौतमस्वामी अपि महावीरं वन्दित्वा पृच्छति 'भगवन्! तव कुशिष्यः गोशालः कालं कृत्वा कुत्र उपपन्नः?।' भगवता भणितं 'अच्युते देवलोके द्वाविंशत् सागरोपमायुष्कः देवः जातः।' गौतमेन भणितं 'भगवन्! कथं तथाविधमहापापकरणेऽपि एवंविधदिव्यदेवर्द्धिलाभः समुत्पन्नः?।' ततः शिष्टः स्वामिना तस्य सर्वः अपि मरणसमयसमुत्पन्नाऽतुच्छपश्चात्तापादिवृत्तान्तः।' पुनरपि गौतमेन भणितं 'भगवन्! ततः स्थानतः सः आयुष्कक्षयेण कुत्र उत्पत्स्यते?, कदा वा सिद्धिं प्राप्स्ये?।' भगवता जल्पितं 'गौतम निश्रुणु, इहैव जम्बूद्वीपे द्वीपे, भरते वर्षे, **विन्ध्यगिरि**पादमूले **पुण्ड्रा**ऽभिधाने जनपदे **सुमतेः** राज्ञः **भद्रा**ऽभिधान्याः देव्याः गर्भे सः गोशालः तस्मात् च्युत्वा पुत्रतया प्रादुर्भविष्यति। ततः नव

જેવી કાંતિવાળા વીર ભગવાન શોભવા લાગ્યા. હવે વર્ધમાન જિનેશ્વરનો રોગ નાશ પામવાથી સર્વ સંઘ હર્ષથી વિકસ્વર નેત્રવાળો થયો, તથા વૃદ્ધિ પામ્યો છે આનંદનો સમૂહ જેનો એવા સુર ને અસુરના સમૂહો પોતાની સ્ત્રીઓ (દેવીઓ) સહિત નૃત્ય કરવા લાગ્યા.

હવે ગૌતમસ્વામી ગણધરે પણ મહાવીરસ્વામીને નમીને પૂછ્યું કે-'હે ભગવન! આપનો કુશિષ્ય ગોશાળો કાળ કરીને (મરીને) ક્યાં ઉત્પન્ન થયો?' ભગવાને કહ્યું-'અચ્યુત દેવલોકમાં બાવીશ સાગરોપમના આયુષ્યવાળો દેવ થયો છે.' ગૌતમે કહ્યું-'હે ભગવન! તથાપ્રકારના મોટાં પાપ કર્યાં છતાં પણ તેને આવા પ્રકારની દિવ્ય દેવઋદ્ધિનો લાભ કેમ થયો?' ત્યારે સ્વામીએ તેને મરણસમયે ઉત્પન્ન થયેલો અત્યંત પશ્ચાત્તાપ વિગેરે સંબંધી સર્વ વૃત્તાંત કહ્યો. ત્યારે ફરીથી ગૌતમસ્વામીએ કહ્યું કે- 'હે ભગવન! આયુષ્યનો ક્ષય થશે ત્યારે તે સ્થાનથી ચ્યવીને ક્યાં ઉત્પન્ન થશે? અથવા ક્યારે સિદ્ધિપદને પામશે?' ભગવાને કહ્યું-'હે ગૌતમ! સાંભળ. અહિં જ જંબૂદ્વીપ નામના દ્વીપમાં ભરતક્ષેત્રમાં વિંધ્યગિરિની તળેટીએ **પુંડ્ર** નામના દેશમાં **સુમતિ** નામના રાજાની **ભદ્રા** નામની રાણીના ગર્ભમાં તે ગોશાળો

गब्भे सो गोसालो तत्तो चवित्ता पुत्तत्ताए पाउब्भविस्सइ, तओ नवण्हं मासाणं समहिगाणं समइक्कंताणं पजाइही, तस्स य जम्मसमए तत्थ नयरे सब्भंतरबाहिरे भारग्गसो य कुंभग्गसो य परिमलायड्ढियफुल्लंधुयधूसरा पउमवुट्ठी रयणवुट्ठी य भविस्सइ। चंदसूरदंसणप्पमुहजम्मणमहूसवं काऊण य अम्मापियरो दुवालसमे दिवसे संपत्ते जम्मदिणाणुरूवं **महापउमो**त्ति से नामं करिस्संति। अह समुचियकाले अहिगयकलाकलावं तं सोहणंमि तिहि-नक्खत्त-मुहुत्तंमि महया रायाभिसेएणं अभिसिंचिहिन्ति। तओ सो अक्खलियपरक्कमो पयंडपयावपडिहयपडिवक्खो अहमहमिगाए पणमंतनरिंदसंदोहमउलिमालालालियचलणो महाराओ भविस्सइ। तस्स य महापउमस्स विजयजत्तमुवट्ठियस्स **पुन्नभद्दमाणिभद्द**नामाणो दो देवा महड्ढिया महापरक्कमा सेणाकम्मं करिस्संति। ते य राईसर-सेणावइ-मंति-सामंतपमुहा पहाणजणा एवंविहं वइयरमुवलब्भ पहरिसुस्ससियरोमकूवा महापउमस्स रण्णो गुणनिप्फण्णं **देवसेणो**त्ति दुइज्जं नामधेयं निम्मविस्संति।

मासानां समतिक्रान्तानां प्रजनिष्यते, तस्य च जन्मसमये तत्र नगरे साभ्यंतरबाह्या भाराग्रशः च कुम्भाग्रशः च परिमलाऽऽकृष्टपुष्पन्धयधूसरा पद्मवृष्टिः रत्नवृष्टिश्च भविष्यति। चन्द्र-सूर्यदर्शनप्रमुखजन्म-महोत्सवं कृत्वा च मातापितरौ द्वादशतमे दिवसे सम्प्राप्ते जन्मदिनाऽनुरूपं **महापद्मः** इति तस्य नाम करिष्यन्ति। अथ समुचितकाले अधिगतकलाकलपं तं शोभने तिथि-नक्षत्र-मुहूर्ते महता राजाऽभिषेकेन अभिसिञ्चिष्यन्ति। ततः सः अस्खलितपराक्रमः प्रचण्डप्रतापप्रतिहतप्रतिपक्षः अहमहमिकया प्रणमन्नरेन्द्रसन्दोहमौलिमालालालितचरणः महाराजः भविष्यति। तस्य च महापद्मस्य विजययात्रामु-पस्थितस्य **पूर्णभद्र-माणिभद्र**नामकौ द्वौ देवौ महद्धिकौ, महापराक्रमौ सेनाकर्म करिष्यतः। ते च राजेश्वर-सेनापति-मन्त्रि-सामन्तप्रमुखाः प्रधानजनाः एवंविधं व्यतिकरमुपलभ्य प्रहर्षोच्छ्रितरोमकूपाः महापद्मस्य राज्ञः गुणनिष्पन्नं **देवसेनः** इति द्वितीयं नामधेयं निर्मास्यन्ति। अन्यदा च तस्य राज्ञः

ત્યાંથી ચ્યવીને પુત્રપણે અવતરશે. ત્યારપછી કાંઇક નવ માસ વ્યતીત થશે ત્યારે તે જન્મ પામશે. તેના જન્મસમયે તે નગરની બહાર અને અંદર સુગંધથી ખેંચાયેલા ભમરાવડે ધૂસર વર્ણવાળી ઘણા ભારવાળી પદ્મની વૃષ્ટિ અને ઘણા ઘડા રત્નની વૃષ્ટિ થશે. પછી અનુક્રમે ચંદ્ર-સૂર્યનું દર્શન વિગેરે જન્મ સંબંધી મહોત્સવ કરીને, તેના માતા-પિતા બારમો દિવસ પ્રાપ્ત થશે ત્યારે જન્મદિવસને યોગ્ય એવું તેનું **મહાપદ્મ** નામ પાડશે. ત્યારપછી યોગ્ય કાળે કળાના સમૂહને ભણેલા તેને સારા તિથિ, નક્ષત્ર અને મુહૂર્ત્તને વિષે મોટા રાજ્યાભિષેકવડે અભિષેક કરશે. ત્યારપછી અસ્ખલિત પરાક્રમવાળો, પ્રચંડ પ્રતાપવડે શત્રુને હણનાર, હું પહેલો હું પહેલો એમ કહીને નમસ્કાર કરાતા રાજાઓના સમૂહના મસ્તકની માળા(શ્રેણિ)વડે જેના ચરણ લાલન કરાયા છે એવો તે મહાપદ્મ મોટો રાજા થશે. તે મહાપદ્મ રાજા વિજયયાત્રા કરવા નીકળ્યો, તે વખતે **પૂર્ણભદ્ર** અને **માણિભદ્ર** નામના મોટી ઋદ્ધિવાળા અને મોટા પરાક્રમવાળા બે દેવો સેનાપતિનું કાર્ય કરશે. તે વખતે તે રાજાઓ, ઇશ્વરો, સેનાપતિઓ મંત્રીઓ અને સામંતો વિગેરે પ્રધાન લોકો આ વૃત્તાંત જાણીને હર્ષથી વિકસ્વર રોમાંચવાળા થઇને તે મહાપદ્મ રાજાનું ગુણથી બનેલું **દેવસેન** એવું બીજું નામ પાડશે. એક દિવસે તે રાજાને શરદઋતુના પૂર્ણચંદ્ર જેવો શ્વેત, ચાર દાંતવાળો, સાત

अण्णया य तस्स रण्णो सरयससहरधवलं चउद्दंतं सत्तंगपइट्ठियं लट्ठं हत्थिरयणमुप्पज्जिही। तम्मि य सो समारूढो एरावणपट्ठिट्ठिओव्व पुरंदरो उवसोभेमाणो इओ तओ परिभमिस्सइ। तयणंतरं पुणोऽवि ते राईसरादओ जणा नियपहुसिद्धिपलोयणुप्पन्नपमोयभरतरलिया तस्स राइणो **विमलवाहणो**त्ति तइयं नामधेयं पइट्ठिस्संति। अह अन्नया कयाई तस्स रज्जभरमणुपालिंतस्स पुव्वभवब्भत्थतवस्सिजणविणासहीलणप्पमुहाणत्थपच्चइयकम्मदोसेण समणसंघोवरि बाढं पओसो समुप्पज्जिही,

तो सो सधम्मकम्मुज्जएऽवि एगे तवस्सिणो हणिही।
अन्ने पुण बंधिस्सइ विविहपयारेहिं बंधेहिं ।।१।।

अक्कोसेही एगे उवहसिही तदपरे महापावो।
अन्नेसि निग्घिणमणो कारावित्सइ छविच्छेयं ।।२।।

शरदशशधरधवलं चतुर्दन्तं सप्ताङ्गप्रतिष्ठितं मनोहरं हस्तिरत्नम् उत्पस्यते। तस्मिन् च सः समारूढः ऐरावणपृष्ठिस्थितः इव पुरन्दरः उपशोभमानः इतस्ततः परिभ्रमिष्यति। तदनन्तरं पुनरपि ते राजेश्वरादयः जनाः निजप्रभुसिद्धिप्रलोकनोत्पन्नप्रमोदभरतरलिताः तस्य राज्ञः **विमलवाहनः** इति तृतीयं नामधेयं प्रतिस्थापयिष्यन्ति। अथ अन्यदा कदाचित् तस्य राज्यभरमनुपालयतः पूर्वभवाऽभ्यस्ततपस्विजनविनाश-हीलनाप्रमुखाऽनर्थप्रत्ययिककर्मदोषेण श्रमणसङ्घस्य उपरि बाढं प्रदोषः समुत्पत्स्यते।

ततः सः स्वधर्मकर्मोद्यतानपि एकान् तपस्विनः हनिष्यति।
अन्यान् पुनः बन्धिष्यति विविधप्रकारैः बन्धैः ।।१।।

आक्रोशयिष्यति एके, उपहसिष्यसि तदपरे महापापः।
अन्येषां निर्घृणमनः कारयिष्यति छविच्छेदम् ।।२।।

અંગે પ્રતિષ્ઠિત અને પુષ્ટ દેહવાળો હસ્તિરત્ન પ્રાપ્ત થશે. તેના પર આરૂઢ થયેલો તે ઐરાવણ હાથી ઉપર બેઠેલા ઇંદ્રની જેમ શોભતો આમતેમ ફરશે. ત્યારે ફરીને પણ તે રાજા, ઇશ્વર વિગેરે પ્રધાન લોકો પોતાના સ્વામીની આવી સિદ્ધિ જોવાથી, મોટા પ્રમોદ(હર્ષ)નો ભાર ઉત્પન્ન થવાથી ચપળ થઈને તે રાજાનું **વિમળવાહન** એવું ત્રીજું નામ પાડશે. હવે એકદા ક્વચિત્ રાજ્યના ભારનું પાલન કરતા તેને પૂર્વભવમાં અભ્યાસ કરેલા તપસ્વીજનોનો વિનાશ અને હીલના વિગેરે અનર્થના આશ્રયવાળા કર્મદોષવડે શ્રમણસંઘ ઉપર અત્યંત પ્રદ્વેષ ઉત્પન્ન થશે.

તેથી કરીને તે પોતાના ધર્મકાર્યમાં ઉદ્યમવાળા એવા પણ કેટલાક તપસ્વીઓને હણશે, વળી બીજાઓને વિવિધ પ્રકારના બંધનોવડે બાંધશે, (૧)

તે મહાપાપી રાજા કેટલાકને આક્રોશ કરશે (ગાળો દેશે), કેટલાકની હાંસી કરશે, નિર્દય મનવાળો તે કેટલાકના ચામડીનો છેદ કરાવશે, (૨)

एगेसिं हरिस्सइ वत्थपत्तकंबलपमोक्खमुवगरणं।
अन्नेसिं समणाणं वारिस्सइ भत्तपाणंपि ।।३।।

अन्ने निव्वासिस्सइ नियनयरपुरागरासयाहिंतो।
अन्ने पुण मारिस्सइ सत्थेहिं लहू सहत्थेण ।।४।।

इय एवंविहमसमंजसं तओ पेच्छिऊण पउरजणा।
भत्तिविणउत्तिमंगा तं एवं विन्नविस्संति ।।५।।

देव! न जुत्तं सोउंपि एयमच्चंतमजससंजणगं।
समणाण धम्मविग्घो जं एवं हवइ तुह रज्जे ।।६।।

एकेषां हरिष्यति वस्त्र-पात्र-कम्बलप्रमुखमुपकरणम्।
अन्येषां श्रमणानां वारयिष्यति भक्त-पानमपि ।।३।।

अन्यान् निर्वासयिष्यति निजनगर-पुराऽऽकरशतेभ्यः।
अन्यान् पुनः मारयिष्यति शस्त्रैः लघुः स्वहस्तेन ।।४।।

इति एवंविधमसमञ्जसं ततः प्रेक्ष्य पौरजनाः।
भक्तिविनतोत्तमाङ्गाः तम् एवं विज्ञापयिष्यन्ति ।।५।।

देव! युक्तं श्रोतुमपि एतदत्यन्तम् अयशःसञ्जनकम्।
श्रमणानां धर्मविघ्नः यद् एवं भवति तव राज्ये ।।६।।

કેટલાંકના વસ્ત્ર, પાત્ર, કંબલ વિગેરે ઉપકરણોને હરી લેશે, કેટલાક સાધુઓના ભાતપાણીનો નિષેધ કરશે, (૩)

કેટલાકને પોતાના નગર, પુર, આકર અને આશ્રમોમાંથી કાઢી મૂકશે અને કેટલાકને પોતાના હાથે જ શીઘ્રપણે શસ્ત્રોવડે મારી નાંખશે. (૪)

આ પ્રમાણે તેનું અયોગ્ય કાર્ય જોઈને ત્યારપછી નગરના લોકો ભક્તિવડે મસ્તક નમાવી તેને આ પ્રમાણે વિનંતિ કરશે કે-(૫)

'હે દેવ! આપના રાજ્યમાં જે આ પ્રમાણે સાધુઓને ધર્મમાં વિઘ્ન થાય છે તે અત્યંત અપયશને કરનાર હોવાથી સાંભળવું પણ યોગ્ય નથી. (૬)

दुट्ठाण निग्गहो सिट्ठपालणं नियकुलक्कमायरणं।
रायाण एत्तियं चिय सलहिज्जइ किं थ सेसेहिं? ।।७।।

एक्कमकित्ती सव्वत्थ तिहुयणे उन्नमइ महापावं।
अन्नं चिय रज्जखओ हीलिज्जंतेसु समणेसु ।।८।।

अन्नं च-जइ देव! कहव कुप्पंति तुम्ह समणा इमे समियपावा।
ता सयलंपिवि रट्ठं दहंति हुंकारमेत्तेण ।।९।।

एएसिं पभावेणं धरंति धरणिं सुहेण नरवइणो।
एत्तो च्चिय मज्जायं जलनिहिणोऽवि हु न लंघंति ।।१०।।

दुष्टानां निग्रहः शिष्टपालनं निजकुलक्रमाऽऽचरणम्।
राजानां एतावदेव श्लाघ्यते किमथ शेषैः ।।७।।

एवमकीर्तिः सर्वत्र त्रिभुवने उन्नमति महापापम्।
अन्यच्च राज्यक्षयः हीलयत्सु श्रमणेषु ।।८।।

अन्यच्च यदि देव! कथमपि कुप्यन्ति त्वयि श्रमणाः इमे शमितपापाः।
तदा सकलमपि राष्ट्रं दहन्ति हुंकारमात्रेण ।।९।।

एतेषां प्रभावेण धारयति धरणिः सुखेन नरपतिम्।
एतेनैव मयादां जलनिधयः अपि खलु न लङ्घन्ते ।।१०।।

દુષ્ટોનો નિગ્રહ, શિષ્ટ (ઉત્તમ) જનોનું પાલન અને પોતાના કુળના ક્રમનું આચરણ, આ જ રાજાઓને શ્લાઘાનું સ્થાન છે. બીજા કાર્યથી શું ફળ? (૭)

સાધુઓની હીલના કરવાથી સર્વત્ર ત્રણ ભુવનમાં અપકીર્તિ ઉત્પન્ન થાય એ મહાપાપ છે, અને બીજું રાજ્યનો ક્ષય થાય છે. (૮)

વળી બીજું હે દેવ! પાપને શમન કરનારા આ સાધુઓ કદાચ કોઇપણ પ્રકારે આપના ઉપર કોપ કરે તો તેઓ એક હુંકાર માત્રે કરીને જ આખું રાજ્ય બાળી નાંખે. (૯)

એના જ પ્રભાવે કરીને રાજાઓ સુખે કરીને પૃથ્વીને ધારણ કરે છે (પાલન કરે છે), અને આ કારણથી જ સમુદ્રો પણ પોતાની મર્યાદાનું ઉલ્લંઘન કરતા નથી, (૧૦)

ता देव! विरमसु धुवं तवस्सिजणपीडणाओ एयाओ।
अकलंकच्चिय कित्ती जह वियरइ तिहुयणे तुम्ह ।।११।।

इय पुरजणेहिं सुबहुप्पयारवयणेहिं वारिओ संतो।
भावविरहेऽवि सो तं पडिसुणिही तयणुवित्तीए ।।१२।।

अन्नया य सो रहवरारूढो निग्गच्छिही, इओ य सुभूमिभागे उज्जाणे तिनाणोवगओ विउलतेउलेसामाहप्पदुद्धरिसो विविहतवचरणनिरओ **सुमंगलो** नाम तवस्सी आयाविस्सइ। सो य राया तेणप्पएसेण वच्चमाणो तं दट्ठूण निक्कारणुप्पन्नतिव्वकोवानलो सुमंगलं काउस्सग्गट्ठियं रहग्गभागेणं पणोल्लावेही। सो य तेण पणोल्लिओ समाणो धरणीयले निवडिओऽवि सणियं सणियं समुट्ठिऊण पुणो काउस्सग्गेण पलंबियभुओ ठाही। सो य राया तं उड्ढसंठाणसंठियं दट्ठूण पुणोऽवि रहग्गेण पणोल्लावेही। सो य मंदं मंदमुट्ठिऊण

तस्मादेव! विरम धुव्रं तपस्विजनपीडनेभ्यः एतेभ्यः।
अकलङ्का एव कीर्तिः यथा वितरति त्रुभवने तव ।।११।।

इति पुरजनैः सुबहुप्रकारवचनैः वारितः सन्।
भावविरहेऽपि सः तं प्रतिश्रविष्यति तदनुवृत्त्या ।।१२।।

अन्यदा च सः रथवराऽऽरूढः निर्गमिष्यति, इतश्च सुभूमिभागे उद्याने त्रिज्ञानोपगतः विपुलतेजोलेश्यामाहात्म्यदुर्धर्षः विविधतपश्चरणनिरतः **सुमङ्गलः** नामकः तपस्वी आतापयिष्यति सश्च राजा तेन प्रदेशेन व्रजन् तं दृष्ट्वा निष्कारणोत्पन्नतीव्रकोपाऽनलः सुमङ्गलं कायोत्सर्गस्थितं रथाग्रभागेण प्रणोदयिष्यति। सश्च तेन प्रणोदितः सन् धरणीतले निपतितः अपि शनैः शनैः समुत्थाय पुनः कायोत्सर्गेण प्रलम्बितभुजः स्थास्यति। सः च राजा तम् उर्ध्वसंस्थानसंस्थितं दृष्ट्वा पुनरपि

તેથી કરીને હે દેવ! આ તપસ્વીજનને પીડા કરવાથકી આપ જરૂર અટકો, કે જેથી ત્રણ ભુવનમાં આપની કીર્તિ કલંક રહિત વિસ્તાર પામે.' (૧૧)

આ પ્રમાણે નગરના લોકો ઘણા પ્રકારના વચનોવડે તેને વારશે ત્યારે ભાવ વિના પણ લોકોની અનુવૃત્તિએ કરીને તેમનું વચન અંગીકાર કરશે. (૧૨)

